दुर्गा
दुर्गा कवच
कं०

ॐ

श्री दुर्गाकवचम्

अर्गलाकीलकपाठसहितम्

गर्ग एण्ड को० थोक पुस्तकालय

खारी बावली देहली—६

मूल्य =)

* अथ *

❋ दुर्गा कवचम् ❋

अस्य श्रीचण्डीकवचस्य ब्रह्मा ऋषिः। अनुष्टुप्छन्दः

चामुण्डा देवता। अङ्गन्यासोक्तमातरो बीजम्।

दिग्बन्धदेवतास्तत्त्वम्। श्रीजगदम्बाप्रीत्यर्थे

सप्तशतीपाठाङ्गजपे विनियोगः॥

ॐ नमश्चण्डिकायै॥ मार्कण्डेय उवाच—

ॐ यद् गुह्यं परमं लोके सर्वरक्षाकरं नृणाम्॥

यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥१॥
ब्रह्मोवाच—अस्तिगुह्यतमं विप्र सर्वभूतोपका-
रकम् ॥ देव्यास्तु कवचं पुण्यं तच्छृणुष्व
महामुने ॥२॥ प्रथमं शैलपुत्रीति द्वितीयं
ब्रह्मचारिणी ॥ तृतीयं चन्द्रघण्टेति कूष्माण्डेति
चतुर्थकम् ॥३॥ पंचमं स्कन्दमातेति षष्ठं
कात्यायनीति च॥ सप्तमं कालरात्रिश्च महा-
गौरीति चाष्टमम् ॥४॥ नवमं सिद्धिदात्री च

नवदुर्गाः प्रकीर्तिताः॥ उक्तान्येतानि नामानि ब्रह्मणैव महात्मना ॥५॥ अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे ॥ विषमे दुर्गमे चैव भयार्ताः शरणं गताः ॥६॥ न तेषां जायते किंचिदशुभं रणसंकटे ॥ नापदं तस्य पश्यामि शोकदुःखभयं न हि ॥ ७ ॥ यैस्तु भक्त्या स्मृता नूनं तेषां सिद्धिः प्रजायते ॥ प्रेतसंस्था तु चामुण्डा वाराही महिषासना ॥८॥ ऐन्द्री

गजसमारूढा वैष्णवी गरुड़ासना ॥ माहेश्वरी वृषारूढा कौमारी शिखिवाहना ॥९॥ ब्राह्मी हंससमारूढा सर्वाभरण भूषिता ॥ लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया ॥ १० ॥ श्वेतरूपधरा देवी ईश्वरी वृषवाहना ॥ इत्येता मातरः सर्वाः सर्वयोगसमन्विताः ॥ ११ ॥ नानाभरणशोभाड्या नानारत्नोपशोभिताः ॥ दृश्यन्ते रथमारूढा देव्यः क्रोधसमाकुलाः ॥

॥१२॥ शंख चक्रं गदां शक्तिं हलंच मुसला-
युधम् ॥ खेटकं तोमरं चैव परशुं पाशमेव च
॥१३॥ कुन्तायुधं त्रिशूलं च शार्ङ्गमायुध-
मुत्तमम ॥१४॥ दैत्यानां देहनाशाय भक्ता-
नामभयाय च ॥ धारयन्त्यायुधानीत्थं देवानां
च हिताय वै ॥१५॥ नमस्तेऽस्तु महारौद्रे
महाघोरपराक्रमे ॥ महाबले महोत्साहे महा-
भयविनाशिनि॥१६॥ त्राहि मां देवि दुष्प्रेक्ष्ये

शत्रूणां भयवर्द्धिनि ।। प्रांच्यां रक्षतु मामैन्द्री
आग्नेय्यामग्निदेवता ॥१७॥ दक्षिणेऽवतु
वाराही नैर्ऋत्यां खड्गधारिणी ॥ प्रतीच्यां
वारुणी रक्षेद्वायव्यां मृगवाहिनी ॥ १८ ॥
उदीच्यां पातु कौमारी ईशान्यां शूलधारिणी॥
ऊर्ध्वं ब्रह्माणी मे रक्षेद्धस्ताद्वैष्णवी तथा ॥१९
एवं दश दिशो रक्षेच्चामुण्डा शववाहना ॥
जया मे चाग्रतः पातु विजया पातु पृष्ठतः॥२०॥

अजिता वामपार्श्वे तु दक्षिणे चापराजिता ॥
शिखामुद्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता
॥२१॥ मालाधरी ललाटे च भ्रुवौ रक्षेद्य-
शस्विनी ॥ त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा
च नासिके ॥२२॥ शंखिनी चक्षुषोर्मध्ये
श्रोत्रयोर्द्वारवासिनी । कपोलौ कालिका रक्षे-
त्कर्णमूले तु शांकरी ॥ २३ ॥ नासिकायां
सुगन्धा च उत्तरोष्ठे च चर्चिका ॥ अधरे

चामृतकला जिह्वायां च सरस्वती ॥ २४ ॥ दन्तान् रक्षतु कौमारी कण्ठदेशे तु चण्डिका॥ घण्टिकां चित्रघण्टा च महामाया च तालुके ॥२५॥ कामाक्षी चिबुकं रक्षेद्वाचं मे सर्व-मङ्गला। ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी ॥ २६ ॥ नीलग्रीवा बहिःकण्ठे नलिकां नलकूबरी । स्कन्धयोः खड्गिनी रक्षेद् बाहू मे वज्रधारिणी ॥ २७ ॥

हस्तयोर्दण्डिनी रक्षेदम्बिका चाङ्गुलीषु च ।
नखञ्छूलेश्वरी रक्षेत् कुक्षौ रक्षेन्नलेश्वरी
॥ २८ ॥ स्तनौ रक्षेन्महादेवी मनश्शोक-
विनाशिनी । हृदये ललिता देवी ह्युदरे शूल-
धारिणी ॥२९॥ नाभौ च कामिनी रक्षेद्
गुह्यं गुह्येश्वरी तथा । कट्यां भगवती
रक्षेज्जानुनी विन्ध्यवासिनी ॥ ३० ॥ पूतना
कामिका मेढ्ं गुदे महिषवाहिनी ॥ जंघे

महाबला रक्षेत् सर्वकामप्रदायिनी ॥३१॥
गुल्फयोर्नारसिंही च पादपृष्ठेऽमितौजसी।
पादाङ्गुलीषु श्री रक्षेत् पादाधस्तलवासिनी
॥३२॥ नखान् दंष्ट्राकराली च केशाश्चै-
वोर्ध्वकेशिनी। रोमकूपेषु कौमारी त्वचं
वागीश्वरी तथा ॥ ३३ ॥ रक्तमज्जावसा-
मांसान्यस्थिमेदांसि पार्वती। अन्त्राणि
कालरात्रिश्च पित्तं च मुकुटेश्वरी ॥ ३४॥

पद्मावती पद्मकोशे कफे चूडामणिस्तथा। ज्वालामुखी नखज्वालामभेद्या सर्वसन्धिषु ॥ ३५ ॥ शुक्रं ब्रह्माणी मे रक्षेच्छायां छत्रेश्वरी तथा। अहंकारं मनोबुद्धिं रक्षेन्मे धर्मचारिणी ॥ ३६ ॥ प्राणापानौ तथा व्यानमुदानं च समानकम्। वज्रहस्ता च मे रक्षेत्प्राणं कल्याणशोभना ॥ ३७ ॥ रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी।

सत्त्वं रजस्तमश्चैव रक्षेन्नारायणी सदा ॥ ३८॥
आयू रक्षतु वाराही धर्म रक्षतु वैष्णवी ।
यशः कीर्तिं च लक्ष्मी च धनं विद्यां च
चक्रिणी ॥ ३९ ॥ गोत्रमिन्द्राणी रक्षेत
पशून्मे रक्षचण्डिके । पुत्रान् रक्षेन्महालक्ष्मी
भार्यां रक्षतु भैरवी ॥ ४० ॥ पन्थानं सुपथा
रक्षेन्मार्गं क्षेमकरी तथा । राजद्वारे महा-
लक्ष्मींविजयासर्वतः स्थिता ॥ ४१ ॥

रक्षाहीनं तु यत्स्थानं वर्जितं कवचेनतु । तत्सर्वं रक्ष मे देवी जयन्ती पापनाशिनी ॥ ४२ ॥
पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः । कवचेनावृतो नित्यं यत्र यत्रैव गच्छति ॥४३॥
तत्र तत्रार्थलाभश्च विजयः सार्वकामिकः । यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम् ॥४४॥ परमैश्वर्यमतुलं प्राप्स्यते भूतले पुमान् । निर्भयो जायते मर्त्यः सङ्ग्रामेष्वपराजितः

॥४५॥ त्रैलोक्ये तु भवेत्पूज्यः कवचेनावृतः पुमान् । इदं तु देव्याः कवचं देवानामपि दुर्लभम् ॥४६॥ यः पठेत्प्रयतोनित्यं त्रिसन्ध्यं श्रद्धयान्वितः ॥ देवीकला भवेत्तस्य त्रैलोक्येष्वपराजितः ॥४७॥ जीवेद्वर्षशतं साग्रमपमृत्युविवर्जितः ॥ नश्यन्ति व्याधयः सर्वेलूताविस्फोटकादयः ॥४८॥ स्थावरं जङ्गमं चापि कृत्रिमञ्चापि यद्विषम् ॥ सर्वाणि मन्त्रयन्त्राणि

भूतले च पराक्रमे ॥४६॥ भूचराः खेचराश्चैव जलजाश्चापदेशकाः। सहजाः कुलजा माला डाकिनी शाकिनी तथा॥५०॥अन्तरिक्षचरा घोराडाकिन्यश्च महाबलाः। ग्रहभूतपिशाचाश्च यक्षगन्धर्वराक्षसाः ॥५१॥ ब्रह्मराक्षसवेतालाः कूष्माण्डा भैरवादयः। नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते ॥५२॥ मानोन्नतिर्भवे-द्राज्ञस्तेजोवृद्धिकरं परम ॥५३॥ यशसा

वर्धते सोऽपि कीर्तिमण्डितभूतले । जपे-
त्सप्तसतीं चण्डीं कृत्वा तु कवचं पुरा ॥५४॥
यावद्भूमण्डलं धत्ते सशैलवनकाननम् ॥५५॥
तावत्तिष्ठति मेदिन्यां सन्ततिः पुत्रपौत्रिकी ।
देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ॥५६॥
प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ।

लभते परमं रूपं शिवेन सह मोदते ॥ ५७ ॥

इति श्री वाराहपुराणे हरिहरब्रह्मविरचितं

देव्याः कवचं सम्पूर्णम् ॥१॥

॥ श्री जगदम्बार्पणमस्तु ॥

—❀—❀—

अथार्गलास्तोत्रम्

ओं अस्य श्रीअर्गलास्तोत्रमन्त्रस्य विष्णुऋषिः।

अनुष्टुप्छन्दः। श्रीमहालक्ष्मी देवता।

श्रीजगदम्बाप्रीतये सप्तशती-

पाठांगजपे विनियोगः॥

ओं नमश्चण्डिकायै॥ जयन्ती मङ्गला काली भद्रकाली कपालिनी॥ दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते॥

जय त्वं देवि चामुण्डे जय भूतार्तिहारिणी।
जय सर्वगते देवी कालरात्रि नमोऽस्तुते ॥१॥
मधुकैटभविद्राविविधातृवरदे नमः। रूपं देहि
जयं देहि यशो देहि द्विषो जहि ॥२॥
महिषासुरनिर्णाशि विधातृवरदे नमः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि
॥३॥ रक्तबीजवधे देवि चण्ड मुण्ड विना-
शिनि ॥ रूपं देहि जयं देहि यशो देहि

द्विषो जहि ॥४॥ निशुम्भमथने देवि शुम्भा-
सुरनिवर्हिणि। रूपं देहि जयं देहि यशो देहि
द्विषो जहि॥५॥ वन्दिताङ्घ्रियुगे देवि सर्वसौ-
भाग्यदायिनि। रूपं देहि जयं देहि यशो देहि
द्विषो जहि ॥ ६ ॥ अचिन्त्यरूपचरिते सर्व
शत्रुविनाशिनि। रूपं देहिजयं देहियशो देहि
द्विषो जहि॥७॥नतेभ्यः सर्वदा भक्त्या चण्डिके
दुरितापहे। रूपं देहि जयं देहि यशोदेहि द्विषो

जहि ॥८॥ चण्डिके सततं ये त्वामर्चयन्तीह भक्तितः ॥ रूपं देहिजयं देहि यशो देहि द्विषो जहि ॥९॥ स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि। रूपं देहि जयं देहि यशोदेहि द्विषो जहि ॥१०॥ देहि सौभाग्यमारोग्यं देहि देवि परं सुखम्। रूपं देहि जयं देहि यशो देहि द्विषोजहि ॥११॥ विधेहि द्विषितां नाशं विधेहि बलमुच्चकैः। रूपं देहि जयं देहि यशो

देहि द्विषो जहि ॥१२॥ विधेहि देवि कल्याणं विधेहि विपुलां श्रियम्। रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१३॥ सुरासुरशिरो-रत्ननिघृष्टचरणेऽम्बिके। रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१४॥ प्रचण्डदैत्य-दर्पघ्ने चण्डिके प्रणताय मे। रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१५॥ विद्यावंतं यशस्वन्तं लक्ष्मीवन्तं जनंकुरु। रूपं देहिजयं

देहि यशो देहि द्विषो जहि ॥१६॥ चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि । रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१७॥ कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदाम्बिके । रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१८॥ हिमाचलसुतानाथसंस्तुते परमेश्वरि । रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १९ ॥ इन्द्राणीपतिसद्भावपूजिते परमेश्वरि । रूपं

देहि जयं देहि यशो देहि द्विषो जहि ॥२०॥
देविप्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि ॥ रूपं
देहिजयं देहि यशो देहिद्विषो जहि ॥२१॥
देवि भक्तजनोद्दामदत्तानन्दोदयेऽम्बिके ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि
॥२२॥ पुत्रान् देहि धनं देहि सर्वान् कामां-
श्च देहि मे। रूपं देहि जयं देहि यशो
देहि द्विषो जहि ॥२३॥ पत्नी मनोरमां

देहि मनोवृत्तानुसारिणीम् । तारिणीं दुर्ग-संसारसागरस्य कुलोद्भवाम् ॥ २४ ॥ इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः। स तु सप्तशतीसंख्यावरमाप्नोति सम्पदः ॥२५॥

इत्यर्गलास्तोत्रं समाप्तम् ॥२॥

❋ अथ कीलकस्तोत्रम् ❋

अस्य श्रीकीलकमन्त्रस्य कौशिक ऋषिः ।
अनुष्टुप्छन्दः। श्रीमहासरस्वती देवता।
श्रीजगदम्बाप्रीत्यर्थं सप्तशती-
पाठाङ्गजपे विनियोगः ॥

ॐ नमश्चण्डिकायै ॥ मार्कण्डेय उवाच ॥

विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे। श्रेयः
प्राप्तिनिमित्ताय नमः सोमार्धधारिणे ॥१॥

सर्वमेतद्विजानीयान्मन्त्राणामपि कीलकम् ॥
सोऽपिक्षेममवाप्नोति सततं जाप्यतत्परः॥२॥
सिद्ध्यन्त्युच्चाटनादीनि वस्तूनि सकलान्यपि ।
एतेन स्तुवतांदेवीं स्तोत्रमात्रेणसिद्ध्यति॥३॥
न मन्त्रो नोषधं तत्र न किंचिदपि विद्यते ।
विना जाप्येन सिद्धयेत सर्वमुच्चाटनादिकम्
॥४॥ समग्राण्यपि सिद्ध्यन्ति लोकशंका-
मिमां हरः। कृत्वा निमन्त्रयामास सर्वमे-

वमिदं शुभम् ॥५॥ स्तोत्रं वै चण्डिकाया-
स्तु तच्च गुह्यं चकार सः। समाप्नोति सुपुण्येन
यथावदभिमन्त्राणाम् ॥६॥ सोऽपि क्षेमम-
वाप्नोति सर्वमेव न संशयः ॥ कृष्णायां वा
चतुर्दश्यामष्टम्यां वा समाहितः ॥७॥ ददाति
प्रतिगृह्णाति नान्यथैषा प्रसीदति । इत्थं
रूपेण कीलेन महादेवेन कीलितम् ॥ ८ ॥
यो निष्कीलां विधायैनां नित्यं जपति संस्फु-

टम् । स सिद्धः स गणः सोऽपि गन्धर्वो जायते नरः ॥९॥ न चैवाप्पठतस्तस्य भयं कुत्रापि जायते । नापमृत्युवशं याति मृतो मोक्षमवाप्नुयात् ॥१०॥ ज्ञात्वा प्रारभ्य कुर्वीत ह्यकुर्वाणो विनश्यति एवं ज्ञात्वैव सम्पन्नमिदं प्रारभ्यते बुधैः ॥ ११ ॥ सौभाग्यादि च यत्किंचिद् दृश्यते ललनाजने ॥ तत्सर्वं त्वत्प्रसादेन तेन जाप्यमिदं शुभम् ॥१२॥

———

शनैस्तु जप्यमानेऽस्मिन् स्तोत्रं सम्पत्तिरुच्चकैः । भवत्येव समग्रापि ततः प्रारभ्यमेव तत् ॥ १३ ॥ ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसम्पदः । शत्रुहानिः परोमोक्षः स्तूयते सा न किं जनैः ॥ १४ ॥

इति भगवत्याः कीलकस्तोत्रं समाप्तम् ॥

मुद्रक—प्रताप प्रिंटिंग प्रेस लाहौरी गेट देहली ।

卐卐卐

धार्मिक पूजा-पाठ सम्बन्धी पुस्तकों का

सूचीपत्र

- रामायण भाषा टीका (तुलसीकृत) १५)
- रामायण बाल्मीक ८)
- सुखसागर १३)
- प्रेमसागर २||)
- महाभारत भाषा ५)
- रामायण तर्ज राधेश्याम ५)
- दुर्गासप्तसती भाषा टीका २||)
- दुर्गा केवल भाषा २)
- विचार सागर १४)

- गीता-भाषा २)
- सत्यनारायण कथा भाषा टीका ||=)
- सत्यनारायण केवल भाषा =)
- आरती संग्रह =)
- एकादशी माहात्म |||)
- रामायण मूल गुटका २)
- कबीर दोहावली ||)
- तुलसी दोहावली ||)
- कृष्णलीला १)
- कबीर बीजक ||)

गर्ग एण्ड को० थोक पुस्तकालय खारी बावली देहली